# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०१ सेमेस्टर-०१** | **प्रश्नपत्रम्- ०८** | गुणाः - ७० |
| विषयः– पौरोहित्यम् | कोड – CE 112 (OLD) | समयः –२:०० तः ०५:०० |
| दिनाङ्कः – २२/१२/२०१८ | ग्रन्थः – श्रीदुर्गासप्तशती | |

**प्रथमान्वितिः**

**प्रश्नः १ प्रदत्तेभ्यः कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या ।** १०

(१) महामाया हरेश्चैषा तया सम्मोह्यते जगत्।
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥

(२) भगवान् का हि सा देवी महामायेति यां भावान्।
ब्रवीति कथमुत्पन्ना सा कार्मास्याश्च किं द्विजः ॥

(३) सा विधा परमा मुक्तेर्हेतुभूता सनात्नी ।
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वी ॥

**प्रश्नः २ कस्यचिदेकस्य वर्णनं कुरुत।** १०

(१) सुरथवैश्ययोः संवादं वर्णयत।

(२) मधुकैटभवधप्रसङ्गं समीक्षत।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोदत्तेभ्यः यथेच्छं द्वयोः ससन्दर्भं व्याख्या विधेया।** १०

(१) एतद्वः कथितं सर्वममरारिविचेष्टितम्।
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् ॥

(२) गर्ज गर्ज क्षणं मूढ म्धु यावत्पिबाम्यहम्।
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥

(३) या श्रीः स्वयं सुकृतिनां भवनेश्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां न्ताः स्म परिपालय देविविश्वम् ॥

**प्रश्नः ४ कस्याप्येकस्य उतरं यच्छत।** १०

(१) देवानां तेजसा देव्याः जातप्रसङ्गः प्रस्तूयताम्।

(२) महिषासुरवधप्रसंगः व्याख्यायताम्।

**तृतीयान्वितिः**

**प्रश्नः ५ अधस्तनेभ्यः कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या ।** १०

(१) नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥

(२) यो मां जयति सङ्ग्रामे यो मेदर्पं व्यपोहति।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति॥

(३) एकैवाहं जगत्यत्र द्वितीया का ममापरा।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः॥

**प्रश्नः ६ कस्याप्येकस्य सारांशः लेख्यः।** **१०**

(१) देवैः कृता देव्याः स्तुतिः।

(२) देव्याः चरित्रस्य पाठमाहात्म्यम्।

**प्रश्नः ७ प्रदत्तेभ्यः प्रश्नेभ्यः दशप्रश्नानाम् एकैक वाक्येन उतरं दत्त।** **१०**

(१) वैश्यस्य नाम किमासीत् ?

(२) भगवान् कयोः शिरसी चक्रेण चिच्छेद ?

(३) वैश्यः कस्य कुले समुत्पन्नः ?

(४) पराजिताः देवाः प्रजापतिं पुरस्कृत्य क्व गताः ?

(५) देव्यै कमण्डलुं कः ददौ ?

(६) विश्वकर्मा देव्यै किं दत्तवान् ?

(७) परं प्रहर्षं के जग्मुः ?

(८) विष्णुमायां देवीं देवाः कुत्र प्रतुष्टुवुः ?

(९) दूतत्वेन सुग्रीवं कःप्रेषयामास ?

(१०) केने नाम्ना लोके देवी ख्याता भविष्यति ?

(११) दुर्गासप्तसत्यां कति श्लोकाः सन्ति ?

(१२) कीदृशी देवी रोगानशेषानपहन्ति ?

(१३) दुर्गासप्तशती कस्मिन् पुराणे प्रोक्ता?

(१४) भगवान् हरिः कति वर्षाणि युयुधे?

(१५) सुरथो नाम कः आसीत्?

***